दिनाङ्क :- 18.11.2025

प्रात: - 06:55

प्रधानमन्त्री गोएन्का-व्याख्यानम्

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान्, यत् भारतं विकसितम्, आत्मनिर्भरम् च भवितुम् उत्सुकम् वर्तते। नवदिल्लीनगरे षष्ठं रामनाथ-गोएन्का-व्याख्यानं सम्बोधयन् श्रीमोदिना उक्तं, यदेकत्र विश्वं विकासमाश्रित्य भयभीतं वर्तते तदन्यत्र भारतं आत्मविश्वासेन उज्ज्वलभविष्यस्य दिशि गच्छति। प्रधानमन्त्रिणा प्रतिपादितम्, यत् भारतं न केवलं उदयमानं विपण्यं, अपि तु उदयमानं प्रतिरूपम् अपि। सः प्रकाशितवान् यत् अद्यत्वे विश्वं भारतीय-विकासस्य प्रतिरूपम्, आशायाः आदर्शरूपेण पश्यति।

श्रीमोदिना उक्तम्, जनाः दृष्टवन्तः यत् एकविंशतिशताब्दस्य विगतानि पञ्चविंशति वर्षाणि कथं महता वेगेन गतानि, एकस्य पश्चात् अन्यस्य संकटस्य आव्हानं च आगतं तथापि भारतस्य विकासस्य गतिः बाधिता न अभवत्। सः अवदत् यत् वैश्विक-आव्हानानां मध्येऽपि भारतीय-अर्थव्यवस्था द्रुततर-वेगेन वर्धमाना अस्ति।

बिहार सरकार घटनम् :

बिहारे नवनिर्वाचित-भाजपा-दलस्य विधायकाः अद्य पटना-नगरे संगोष्ठीं कृत्वा तेषां नेतारं निर्वाचयन्ति। ऐषमे बिहारविधानसभा-निर्वाचने भाजपादलस्य एकोन-नवतिः आसनानि प्राप्तानि। बिहार-भाजपा-अध्यक्षः दिलीप जायसवालेन उक्तं यत्, दलस्य पर्यवेक्षकाः अपि सभायां भागं गृह्णन्ति। संयुक्त-जनता-दलस्य विधायकाः दलस्य नेतृ-निर्वाचनाय श्वः पटनानगरे सम्मिलन्ति। नवनिर्वाचिताः जेडियु इति दलस्य विधायकानां ह्यः एव मेलनं निश्चितमासीत् किन्तु कारणान्तरेण तत् स्थगितम्। एतत् निर्धारित-समय-परिवर्तनानन्तरम् अधुना सम्भावना वर्तते यत् अद्य निर्धारिता एनडीए मैत्रिकूटस्य विधायक-सभा अपि अग्रे भविष्यति। एनडीए-मैत्रिकूटस्य प्रत्येकं घटकदलं स्वस्य नेतारं निर्वाचयितुं स्वस्य विधायक-दलस्य सम्मेलनं करिष्यति तदनन्तरं एनडीए-समूह-दलस्य विधायकानां संयुक्तसभा भविष्यति। नूतनमन्त्रिमण्डलस्य शपथग्रहणसमारोहः गुरुवासरे पटनानगरस्य गान्धी-मैदान इत्यत्र भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी एनडीए-समूहस्य अनेके वरिष्ठनेतारः, मन्त्रिणः च शपथ-समारोहे उपस्थिताः भविष्यन्ति इति अपेक्षा अस्ति। राष्ट्रीयजनतादलस्य नवनिर्वाचितविधायकानां संगोष्ठी ह्यः पटनानगरे अभवत्, यत्र तेजस्वी-प्रसाद-यादवः नेतृरूपेण निर्वाचितः।

अश्वनी-ईसीएमएस :

विद्युदीय तथा सूचना प्रौद्योगिकी मन्त्री श्रीअश्विनी-वैष्णवः नवदिल्ल्यां विद्युदीय-घटक-निर्माण-योजनायाःकृते द्वितीय-मुद्राखण्डस्य घोषणां कृतवान्। अस्य द्वितीयखण्डस्य अन्तर्गतं सप्त-सहस्रकोटिरूप्यकाणां व्ययेन सप्तदश-आवेदनानि अनुमोदितानि

सन्ति । वार्ताहरान् ज्ञापयन् श्रीवैष्णवः अवदत् यत् एतेषु सप्तदश परियोजनासु षष्टि-सहस्रकोटिरूप्यकाणां उत्पादनं भविष्यति, एकादश-सहस्राधिकाः उद्योगावसराः च सृज्यन्ते।

<u>प्रधानमन्त्री शेख हसीनाँ</u>

बाङ्गलादेशस्य पदच्युत-प्रधानमन्त्री शेख हसीनाँ तथा पूर्वगृहमन्त्री असदुज्जमाँ खान कमाल इत्यनयोः द्वयोः कृते तद्देशस्य अन्ताराष्ट्रिय आपराधिकन्यायालयेन मानवताविरुद्धं अपराधानां कृते मृत्युदण्डः श्रावितः। ध्यातव्यमस्ति यत् न्यायाधिकरणेन आरक्षि-महानिरीक्षकस्य चौधरी-अब्दुल्लाह-अल्-मामुन इत्याख्यस्य कृते अस्मिन्नेव प्रकरणे पञ्चवर्षीय-कारावास - दण्डः श्रावितः आसीत् । अपरत्र, भारतस्य विदेशमन्त्रालयेन उक्तं, यत् भारतं बाङ्गलादेशस्य शान्तिं, लोकतन्त्रं, स्थिरतां प्रति च प्रतिबद्धः अस्ति, देशे सर्वैः हितधारकैः सह रचनात्मकरूपेण संलग्नः भविष्यति ।